श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ नीळासूक्तम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ नीळासूक्तम् ॥

॥ हरिः ओं ॥ नी॒ळां दे॒वीग्ं शर॑णम॒हं प्रप॑द्ये सु॒तर॑सि तरसे॒ नमः॑। गृ॒णा॒हि॒। घृ॒तव॑ती सवि॒तराधि॑पत्यैः॒ पय॑स्वती॒ रन्ति॒राशा॑नो अस्तु॒। ध्रु॒वा दि॒शां विष्णु॑प॒त्न्यघो॑रा॒ऽस्ये-शा॑ना॒ सह॑सो॒ या म॒नोता᳚। बृह॒स्पति॑र्मात॒रिश्वो॒त वा॒यु॒स्सं॑ध्रु॒वा॒ना वाता॑ अ॒भि नो॑ गृणन्तु॒। वि॒ष्ट॒म्भो दि॒वो ध॒रुणः॑ पृथि॒व्या अ॒स्येशा॑ना॒ जग॑तो॒ विष्णु॑पत्नी। वि॒श्वव्य॑चा इ॒षयन्ती॒ सु॒भू॑तिश्शि॒वानो॑ अ॒स्त्वदि॑तिरु॒प॒स्थे᳚। ओं म॒हा॒दे॒व्यै च॑ वि॒द्महे॑ विष्णु॒प॒त्न्यै च॑ धीमहि। तन्नो॑ नीळा प्रचो॒दया᳚त्॥